International Journal of Sanskrit Research 2021; 7(1): 481-483

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 481-483
© 2021 IJSR
www.anantaajournal.com
Received: 13-10-2020
Accepted: 02-12-2020

**Dr. Viswaja S Nair**
Assistant Professor, P.G. Department of Sanskrit, Sree Krishna College, Guruvayur, Thrissur Dist, Kerala, India

**Corresponding Author:**
**Dr. Viswaja S Nair**
Assistant Professor, P.G. Department of Sanskrit, Sree Krishna College, Guruvayur, Thrissur Dist, Kerala, India

# स्वातितिरुनाल् रामवर्ममहाराजस्य संस्कृतरचनाः – एकमवलोकनम्।

**Dr. Viswaja S Nair**

**सारांशः**
स्वातितिरुनाल् रामवर्मा (१८१३–१८४६) तिरुवितांकूर् राज्यस्य शासकः आसीत्। त्रयस्त्रिंशत् वर्षकालीनजीवनेन तेन कृतानि राज्यस्य नवोत्थानप्रवर्तनानि अद्यापि प्राधान्यत्वेन केरलीयैः स्मर्यन्ते। बहुभाषापण्डितः सकलकलावल्लभश्चेति प्रसिद्धः सः केरलीयसंस्कृतपरम्परायामन्यतमः। स्यानन्दूरपुरवर्णनप्रबन्धः, भक्तिमञ्जरिः पद्मनाभशतकम्, उत्सवप्रबन्धः, अजामिलोपाख्यानम्, कुचेलोपाख्यानम् इत्यादयः तेन विरचिताः संस्कृतकृतयः सन्ति। कर्णाटकसंगीतलोके अद्वितीयः सः संस्कृतभाषायामनेकाः कृतयः अलिखत्। तस्य कालः संगीतकलायाः सुवर्णकाल इति केरलीयैः गण्यन्ते। पत्रेऽस्मिन् संस्कृतभाषायां स्वातितिरुनाल् महाराजस्य सम्भावनानामवलोकनं कर्तुमुद्दिश्यते।

**कूटशब्दाः** स्वातितिरुनाल् रामवर्मा, भक्तिमञ्जरिः, पद्मनाभशतकम्, उत्सवप्रबन्धः, अजामिलोपाख्यानम्, कुचेलोपाख्यानम्, केरलीयसंस्कृतपण्डितः।

## प्रस्तावना

स्वातितिरुनाल् रामवर्मा (१८१३–१८४६) तिरुवितांकूर् राज्यस्य शासकः आसीत्। शासकः इति प्रशस्त्यपेक्षया संगीतज्ञः इति सः लोके प्रसिद्धः। तिरुवितांकूर् राजवंशे अष्टाशीत्यधिकनवशततमे कोलम्बाब्धे मेषमासस्य स्वातिनक्षत्रे, 1813 तमे ख्रिस्त्वब्धे एप्रिल् मासस्य षोडशदिनाङ्के तस्य जन्माभवत् [1]। पद्मनाभदासवञ्चिभूपाल. श्रीरामवर्माकुलशेखरपेरुमाल् इति तस्य पूर्णनाम। तिरुवितांकूर् राजवंशस्य राणि लक्ष्मीबायि, चङ्ङनाशेरि राजवंशस्य राजराजवर्मा वलियकोयित्तम्पुरान् च तस्य पितरौ। पिता तु महापण्डितः, भक्तश्चासीत्। शिशोः जननसमये माता तिरुवितांकूर् राजवंशस्य राज्ञी आसीत्। तदा वंशे राज्यपालनाय कोऽपि पुरुषप्रजा नासीत् इत्यतः स्वातिनक्षत्रे भूजातस्य शिशोरागमनं राज्ये सर्वत्र जनाः साघोषमस्वीकुर्वन्। मातुः गर्भे स्थित्वैव युवराजपदवीं प्राप्तवानित्यतः रामवर्मा गर्भश्रीमानिति च प्रसिद्धः। 1813 जूलाई मासस्य 29 दिनाङ्के शिशुः सः तिरुवितांकूर् राजपदवीं प्राप्तवान्, किन्तु शासनकार्याणि मातैव अकरोत्। द्वितीयपुत्रस्य उत्रं तिरुनाल् मार्ताण्डवर्मायाः जननानन्तरं मात्रा दिवंगता। तदनन्तरं राणि पार्वतिबायि शासनमकरोत्।

पितृसकाशात्, राणि पार्वतिबायिसकाशात्, तथा अरिप्पाट्ट् कोच्चुपिल्ला वारियर् सकाशात् च बाल्यकालविद्याभ्यासः तेन प्राप्तः। तञ्जावूर् सुब्बरावू तमाङ्गलं पाठितवान्। मेरुस्वामि तं विविधशाखासङ्गीतमभ्यासयत्। तस्य सन्यासिनः स्वाधीनेन रामवर्मा नादोपासकरूपेण परिवर्तितवान्। कोच्चुपिल्ला वारियर् महाभागः तस्य संस्कृतशिक्षकः आसीत्। संस्कृतव्याकरणं, काव्यानि, नाटकानि, राजनीतिग्रन्थाः, स्मृत्यादयः गुरुसकाशात् तेन प्राप्तः। क्षीराब्धिशास्त्रि अथवा शिवगुरुः सकाशात् वेदान्तादि.आत्मीयदर्शनविषयाः तेन पठितम्।

1829 एप्रिल् मासस्य विंशतिदिनाङ्के, स्वस्य षोडशे वयसि सः राणिपार्वतिबायितः महाराजपदवीं स्वीकृत्य शासनमारब्धवान्। त्रयस्त्रिंशत् वर्षकालीनजीवनेन तेन कृतानि राज्यस्य नवोत्थानप्रवर्तनानि अद्यापि प्राधान्यत्वेन केरलीयैः स्मर्यन्ते। स्वातितिरुनाल् महाराजः सम्पूर्णजीवने पद्मनाभसेवानिष्ठः आसीत्। पद्मनाभदासनाम्नि सः प्रसिद्धः। तिरुवट्टार् नारायणिपिल्ला तङ्कच्चि तस्य भार्यापदवीमलंकृतवती। चित्तिरतिरुनाल् अनन्तपद्मनाभन् तस्य पुत्रः।1846 डिसम्बर् मासस्य पञ्चविंशतिदिनाङ्के महाराजा स्वातितिरुनाल् दिवंगतः ।

बहुभाषापण्डितः, सकलकलावल्लभश्चेति प्रसिद्धः सः संस्कृत.मलयाल.हिन्दी.तमिल्.तेलुगु.कन्नडा.पेर्ष्यन्.आङ्गलादिषु भाषासु काव्यरचनामकरोत्। तस्य कालः संगीतकलायाः सुवर्णकाल इति केरलीयैः गण्यन्ते। संगीतलोके अद्वितीयः सः संस्कृतभाषायामनेकाः कृतयः अरचयत्।

केरलीयसंस्कृतपरम्परायामन्यतमस्य तस्य नाम सुवर्णलिपिषु लिखितं वर्तते। तस्य कृतयः पद्मनाभप्रार्थनारूपेण, प्रशस्तिरूपेण च निर्मिताः। स्यानन्दूरपुरवर्णनप्रबन्धः (पद्मनाभप्रबन्धम्), भक्तिमञ्जरिः, श्रीपद्मनाभशतकम्, अजामिलोपाख्यानम्, कुचेलोपाख्यानम् इत्यादयः पञ्जसंस्कृतस्वतन्त्रकृतयः, तदा निलकण्ठदीक्षितस्य अन्यापदेशशतकस्य प्रतिपद्यस्य अवतारिका च तेन विरचिताः सन्ति। मणिप्रवाळभाषायाम् उत्सवप्रबन्धः, मुहनाप्रासान्त्यप्रासादिव्यवस्था, संगीते मुहन.प्रास.अन्त्यप्रासादीनां व्यवस्था इति गद्योपन्यासः च तस्य कृतयः । [2]

**भक्तिमञ्जरिः**

भागवतं विष्णुपुराणं चाधारीकृत्य लिखितस्यास्य काव्यस्य विषयः भक्तिरेव। श्रवणं, कीर्तनं, स्मरणं, पादसेवनं, अर्चनं, वन्दनं, दास्यं, सख्यं, आत्मनिवेदनं इति नवविधभक्तेः विविधभावाः दशशतकेषु प्रतिपादिताः भवन्ति। प्रत्येकशतके शतश्लोकमिति गणनया सहस्रश्लोकयुक्तं भक्तिकाव्यमिदम्। अन्तिमदशके एकाधिकशतश्लोकाः घटिताः। विभिन्नवृत्तयुक्तं भवतीदम्।
नवविधभक्तिः मञ्जर्याः प्रतिपाद्यविषयः। प्रथमशतके सकाम.निष्कामभक्तिः, उत्तम.मध्यम.अधमभक्तिः, भक्तिमाहात्म्यम्, द्वितीयशतके गजेन्द्रमोक्षकथा, कौरवसभायां द्रौपदीसंरक्षणकथा, प्रह्लादचरितमित्यादयः तथा तृतीयशतके पद्मनाभकेशादिपादवर्णना, एवं चतुर्थशतके जगत्सृष्टिक्रमः, पुरुषार्थसाधकोऽपायरूपेण भक्तिः प्रह्लादवाक्यानुसारेण; श्रुतिवरदकीर्तनं स्मरणमङ्घ्रिसंसेवनमूद्ध च विवृणुते। पञ्चमशतके कथाश्रवणभक्तिः, षष्ठे कीर्तनाख्यभक्तिः, सप्तमे स्मरणात्मकभक्तिः, अष्टमे पादयुगळसेवनाख्यभक्तिः, नवमे अर्चनाख्यभक्तिः, दशमे वन्दनं.दास्यं.सख्यम्.आत्मनिवेदनं च विशदीकरोति। एवं भक्तिसंवर्द्धकैषा कृतिः। [3]

**स्यानन्दूरपुरवर्णनप्रबन्धः अथवा पद्मनाभप्रबन्धम्**

भक्तिमयं, काव्यरसभूयिष्ठं च भवतीदं चम्पूकाव्यम्। अस्मिन् दशास्तबकाः सन्ति। आदिमपञ्चस्तबकेषु श्रीपद्मनाभस्वामिमन्दिरस्य अनन्तशयनबिम्बप्रतिष्ठा.सम्बन्धितं पुरावृत्तम् प्रधानविषयः। बालक्रीडा, प्रत्यक्षदर्शनं, केशादिपादस्तुतिः, मन्दिरवर्णनं, तीर्थमाहात्म्यं, उत्सवप्रशंसा, मृगयावर्णना, अभिषेकयात्रा, तीर्थाभिषेकं, लक्षदीपश्लाखनम् च प्रत्येकस्तबकस्य विषयाः। स्यानन्दूरपुरवर्णनया चम्पू आरभ्यते।

स्वातिजातेन चूडाधृतसरसिजनाभांघ्रियुग्मेन लक्ष्मी
राज्ञीपुत्रेण वञ्जीश्वरकुलजनुषा रामवर्माभिधेन।
भक्त्युद्रेकेण शश्वत्गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शंसदालं निदद्यात्।। [4]
इति अन्तिमश्लोके राज्ञा स्वकीयविवरणानि दत्तानि।

**श्रीपद्मनाभशतकम्**

भक्तिरसप्रधानः, दशदशकेषु विभक्तः, शतश्लोकयुक्तः ग्रन्थः भवत्ययम्। श्रीपद्मनाभस्तुतिपरः, दशावतारवर्णनारूपं च भवतीदं भक्तिकाव्यम्। प्रत्येकेषु अध्यायेषु प्रत्येके वृत्ते श्लोकाः रचिताः। चतुर्थशतकपर्यन्तं लोकसृष्ट्यादिविषयाः प्रतिपादिताः, अनन्तरेषु अवतारकथाः विवृण्वन्ते। सप्तमे दशके रामावतारकथा, अष्टमे नवमे च कृष्णावतारकथा च सूचिताः। अन्तिमे कल्क्यवतारकथासूचनास्तुत्या कृतिः उपसंहृयते। भक्तहृदयाह्लादकमाकर्षकं च भवतीदं काव्यम्।

**अजामिलोपाख्यानम् कुचेलोपाख्यानम् च**

एते द्वे उपाख्याने हरिकथाकालक्षेपकलाकाराणां कृते निर्मिते भवतः। श्लोकाः पदानि अथवा गीतानि च मिश्रीकृत्य अष्टपदिरूपेण एतयोः रचना कृता वर्तते।
कुचेलोपाख्याने 23 पद्यानि, 9 गीतकानि च सन्ति। आलापनोद्देश्येन कृता वर्तते द्वयमपि। ꣲ भज भज मानसहरिमनवरतम् ꣲ इति गीतं कुचेलोपाख्यानस्य प्रसिद्धमेकं भवति। श्लोकापेक्षया गीतान्येव सहृदयानाकर्षयन्ति।

अजामिलोपाख्याने भक्तिमञ्जरीतः केचन श्लोकाः उद्धृताः दृश्यन्ते। ꣲनामसुधामयि पिब मम रसनेꣲ इति प्रथमगीतम् [5]।

**अन्यापदेशशतकस्य अवतारिका**

महाकविनिलकण्ठदीक्षितविरचितस्य अन्यापदेशशतकस्य प्रतिपद्यस्य अवतारिका स्वतिमहाराजेन लिखिता। मूलग्रन्थस्य प्रत्येकस्मिन् पद्ये निलीनं तत्वं विशदीकृत्वा अवतारिका उद्घाटयति।

**मुहनाप्रासान्त्यप्रासादिव्यवस्था**

गीतेषु उपयुक्तानां मुहन.प्रास.अन्त्यप्रासादीनां व्यवस्था अस्मिन् गद्योपन्यासे विशदीकरोति। अयमेकः शास्त्रग्रन्थः। ꣲसंगीतविषयासु साहितीषु प्रयुज्यमानाः शब्दालङ्काराः मुहना, प्रासः, अन्त्यप्रासः इति त्रिधा व्यवह्रियन्तेꣲ इति वाक्येन गद्यमारभ्यते। अस्मिन् चत्वारः भागाः सन्ति। प्रथमभागे मुहनानियमाः, द्वितीये प्रासनियमाः, तृतीये अन्त्यप्रासनियमाः, चतुर्थे अन्तरुक्तिरिति व्यवस्था च विवृण्वन्ति। [6]

**अन्याः संगीतकृतयः**

असंख्यं संगीतकृतयः महाराजेन विरचिताः। तेषु 197 कृतयः संस्कृते भवन्ति। [7] संगीतकृतिषु पद्मनाभ, जलजनाभ, सरसिजनाभ, पङ्कजनाभ इत्यादिनाभान्तपद्मपर्यायपदानि मुद्रारूपेण घटितानि [8] मुक्तकाः, जतिस्वरं, तानवर्णं, चौक्कवर्णं, कीर्तनं, कृतिः, पदं, तिल्लाना, रागमालिकादयः कर्णाटकसंगीतरूपाणि, ध्रुपद्, टप्पा, खयाल् इत्यादीनि हिन्दुस्थानिरूपाणि, साकि, ओवि, दिण्डि इत्यादिमराठीगानरूपाणि च तस्य कृतिषु वर्तन्ते। कीर्तनेषु भूरिशः संस्कृते रचिताः भवन्ति [9] । तेन विरचितेषु 23 वर्णेषु 18 वर्णाः संस्कृतभाषायां रचिताः। घनरागकीर्तनानि, नवरात्रिकीर्तनानि, नवरत्नमालिकाकीर्तनानि च सम्पूर्णतया संस्कृते रचितानि भवन्ति।

**उपसंहारः**

स्वातितिरुनाल् रामवर्मा तिरुवितांकूर् राज्यस्य शासकः आसीत्।त्रयस्त्रिंशत् वर्षकालीनजीवनेन तेन कृतानि राज्यस्य नवोत्थानप्रवर्तनानि अद्यापि प्राधान्यत्वेन केरलीयैः स्मर्यन्ते। बहुभाषापण्डितः, सकलकलावल्लभश्चेति प्रसिद्धः सः केरलीयसंस्कृतपरम्परायामन्यतमः। स्यानन्दूरपुरवर्णनप्रबन्धः, भक्तिमञ्जरिः, पद्मनाभशतकम्, उत्सवप्रबन्धः, अजामिलोपाख्यानम्, कुचेलोपाख्यानम् इत्यादयः तेन विरचिताः संस्कृतकृतयः सन्ति। कर्णाटकसंगीतलोके अद्वितीयः सः संस्कृतभाषायामनेकाः कृतयः रचितवान्। तस्य कालः संगीतकलायाः सुवर्णकाल इति केरलीयैः गण्यन्ते।

**संधर्व सूची**


1. Ravindranath AK. Dakshinendhyan Sangeetham, Samskarika Prasidheekarana Vakupp, Govt. of Kerala, 1998, P – 233.
2. Rajarajavarma Vadakkumkoor. Keraliyasamskrithasahityacharitram-4, Sree Sankaracharya University of Sanskrit, Kalady 1997, P-434
3. Ibid - 453
4. Ibid - 458
5. Ibid - 464
6. Ibid - 465
7. Ibid - 465
8. Venkadasubrahmanya Iyer S. Sangeethasastrapravesika, Keralabhasha institute, Thiruvananthapuram, 1990, P-257
9. Ibid - 258

**ग्रन्थसूची**

1. Parameswara Iyer Ullur S. Keralasahitya Charitram IV, Department of Publication, Kerala University, Thiruvanamthapuram 1990.
2. Ravindranath AK. Dakshinendhyan Sangeetham, Samskarika Prasidheekarana Vakupp, Govt. of Kerala, 1998.
3. Venkadasubrahmanya Iyer S. Sangeethasastrapravesika, Keralabhasha institute, Thiruvananthapuram 1990.
4. Rajarajavarma Vadakkumkoor, Keraliyasamskrithasahityacharitram-4, Sree Sankaracharya University of Sanskrit, Kalady 1997.
5. Srinivasier Padmabhushan Semmangudi R, Narayanaswamy Iyer Veena Vidwan KS, Maharaja Sri Swati Tirunal Kritis ed. Sri Sundararajan VV, Sri Swati Tirunal Kritis. Publication Committee, Trivandrum 1970.